मेत्य गतचिन्तं विधेहि माम् PārśvC. 1. 295.

**अखिलकोण** (akhila-koṇa) *m.* all the corners द्वादशाखिलकोणेषु कर्णश्रृङ्गाणि योजयेत् SamarāSū. 57. 14.

**अखिलक्रम** (akhila-krama) *m.* unbroken process, the order (of the world) without exception अत्रापि जातस्य सतः सम्बन्धो योऽस्य बान्धवैः। सोऽप्यस्तमन्ते देहस्य प्रयात्येषोऽखिलक्रमः MārkP. 76. 34.

**अखिलक्रियाकर्तृ** (akhilakriyā-kartṛ) *m.* the performer of all actions तत्र भ्रूमध्यं गतो जीव आपादमस्तकं व्याप्य कृषिश्रवणाद्यखिलक्रियाकर्ता भवति PaiṅgU. 422. 26 (2. 37)

**अखिलक्रियाकलाप** (akhila-kriyākalāpa) *m.* the whole group of activities, all the undertakings अर्थो नाम जनानां जीवितमखिलक्रियाकलापस्य KalāVi. 7. 1.

**अखिलक्लेश** (akhila-kleśa) *m.* all the miseries, all the troubles कामादित्रिकमेव मूलमखिलक्लेशस्य मायोद्भवम् VijñāS. 97.

**अखिलक्षत्रजाति** (akhila-kṣatrajāti) *f.* the entire *kṣatriya* (warrior) class उत्साद्याखिलक्षत्रजातिं नव नागाः पद्मावत्यां नाम पुर्यामनुगङ्गाप्रयागं गयायाश्च मागधा गुप्ताश्च भोक्ष्यन्ति VisnuP. iv. 24. 63.

**अखिलक्षत्राक्षेप** (akhilakṣatrākṣepa) *m.* insult or affront to all the *kṣatriyas* (members of the warrior caste) तदपि खलु मे स व्याहारस्तुरङ्गमरक्षिणां विकृतिमखिलक्षत्राक्षेपप्रचण्डतयाकरोत् UttaRāC. 5. 29.

**अखिलक्षत्रान्तकारिन्** (akhilakṣatrānta-kārin) *adj.* destroyer of all the *kṣatriyas* (warriors) महापद्मनामा नन्दः परशुराम इवापरोऽखिलक्षत्रान्तकारी भविष्यति VisṇuP. iv. 24. 20.

**अखिलक्षत्रिय** (akhila-kṣatriya) *m.* all the *kṣatriyas* (warriors) ममाखिलक्षत्रियकण्ठलुण्ठनप्रशस्तधारः परशुर्विजृम्भते Rāgh. 4. 66.

**अखिलक्षमापति** (akhila-kṣamāpati) *m.* all the kings समानुजानातु …गृहानिमान् यियासूनखिलक्षमापतीन्। भवानितः ĀnandRa. 8. 18.

**अखिलक्षमाभुज्** (akhila-kṣamābhuj) *m.* all the kings शिरःसुदानादखिलक्षमाभुजाम्। पुरेदमूर्ध्वं भवतीति वेधसा पदं किमस्याङ्कितमूर्ध्वरेखया NaiṣC. 1. 18.

**अखिलक्षय** (akhila-kṣaya) *m.* destruction of everything स प्रीत्यै विदुषां वेदो नाखिलक्षयकारणम् YaśasCam. ii. 412. 22.

**अखिलक्षितिपति** (akhilakṣiti-pati) *m.* lord or king of the whole earth अखिलक्षितिपतेरिक्ष्वाकुकस्य राज्ञो मेघवाहनस्य तनयम्…कुरु विचाराधनपरम् TilaMañ. 401. 21.

**अखिलक्षेत्र** (akhila-kṣetra) *n.* each and every place अगृह्णन्नखिलक्षेत्रवैताढ्यविजयेष्वपि। अम्भोऽम्भोजादिकं तत्रातृप्ताः स्वामिप्रसादवत् TrisaŚaPuC. i. 2. 489.

**अखिलक्षोणिपाल** (akhila-kṣoṇipāla) *m.* all the kings आचक्ष्व चाखिलक्षोणिपाललोकसमक्षम्…शुकव्यतिकरम् TilaMañ. 195. 12.

**अखिलक्षोणीकर** (akhilakṣoṇī-kara) *m.* tax (levied on) the entire earth धिगिमा मेऽखिलक्षोणीकरार्त्तिजनिताः श्रियः PārśvC. 3. 593.

**अखिलक्षोणीचक्र** (akhila-kṣoṇīcakra) *n.* the entire circle of the earth सौभाग्यमत्राखिलक्षोणीचक्रशतक्रतौ निजगदे NaiṣC. 15. 90.

**अखिलक्ष्मा** (akhila-kṣmā) *f.* the entire earth प्रद्युम्नसूरिः … प्रीणाति साखिलक्ष्माम् KumāCaSaṁ. 139. 26.

**अखिलक्ष्मापाल** (akhila-kṣmāpāla) *m.* all the kings पीत्वा कज्जलकालकूटमखिलक्ष्मापालनारीदृशाम् PrasaRā. 3. 37; राजा यद्युपसेविताङ्घ्रिरखिलक्ष्मापालचूडाशतैरासीदस्ति भविष्यति क्षितितले श्रीभोजदेवोपमः SaduktiKa. 186. 32; श्रीमत्काकतिवीररुद्रमखिलक्ष्मापालमौलिस्फुरन्माणिक्यद्युतिरञ्जिताङ्घ्रिम् … स्तोतुं वयं नेश्महे PratāYaBhū. 323. 8.

**अखिलक्ष्माभृत्** (akhila-kṣmābhṛt) *m.* **A** all those who support the earth (i. e. all the kings) पदं व्यातन्वानः सततमखिलक्ष्माभृतां चोपरिष्टात्।…त्वमुच्चैश्चौलुक्येश्वर घटयसे मेघविस्फूर्जितानि ChandaśCū. ii. 323. 3; अखिलक्ष्माभृतां चक्रवर्ती…श्रीमन्माणिक्यचन्द्रः AlaṅkāŚe. i. 0(37); **B** all those who support the earth (i. e. all the mountains) ChandaśCū. ii. 323. 3.

**अखिलक्ष्मामण्डली** (akhila-kṣmāmaṇḍalī) *f.* the whole globe of the earth वीर्यं कन्दुकिताद्रिरूपमखिलक्ष्मामण्डलीमण्डनम्…वेणुधरस्य UjjvaNīMa. 395. 11.

**अखिलखचर** (akhila-khacara) *m.* all the sky-roamers (i. e. the *vidyādharas*) वज्रकुमारः…आत्मपितरमखिलखचराचरितचरणसेवं भास्करदेवं निवेश्य YaśasCam. ii. 312. 17.

**अखिलखेचर** (akhila-khecara) *m.* **A** (Astron.) all the sky-roamers (i. e. all the planets) ज्ञेयं तदेवाखिलखेचराणां पृथक्पृथग्वा रचयेत् तथाष्टौ। वृत्ताण्डलम् Golā. 207. 17 (24. 7); पादेक्षणं भवति सोदरमानराश्योः…अखिलखेचराणाम् JātaPā. 2. 30; **B** all the sky-roamers (i. e. all the *vidyādharas*) तत्र सनत्कुमारस्य संभूयाखिलखेचरैः।…अभिषेको विदधे PārśvC. 6. 1163.

**अखिलगजोपजीविन्** (akhila-gajopajīvin) *m.* all the elephant-attendants अखिलगजोपजीविफेलाजीवनमष्टवङ्कनामपदं लेसिकापसदम्…अनुनयन्ती YaśasCam. ii. 45. 2.

**अखिलगण** (akhila-gaṇa) *m.* **A** all the attendants प्रत्युप्तामखिलगणैर्दिवादिसाराम्…शर्वाणीदयितमः सभामवापत् ŚrīKaC. 17. 5; **B** all the grammatical classes (of verbal roots) ŚrīKaC. 17. 5.

**अखिलगति** (akhila-gati) *f.* all kinds of births अखिलगतिगर्तोत्तरणमार्गैरिव सोपानसर्गैश्चतुर्दिशमुपाहितावतारम् YaśasCam. ii. 301. 4 [*m.* wind ? NT.]

**अखिलगन्धक** (akhilagandha-ka) *n.* one which has all the aromas (i. e. very much aromatic) (बलिरिष्यते) शिम्बान्नं कृसरं याम्ये गन्धर्वेऽखिलगन्धकम् MayaMa. 8. 7.

**अखिलगरल** (akhila-garala) *n.* all (kinds of) poison यत्र च प्रतिहर्म्यशिखरमखिलगरलापहारमणिशिखासङ्गमसमाकुलैरवनहनफणिभिरुन्मुक्तवाजिविधुरं प्रवर्तयति सारथौ रथम् UdaySuKa. 21. 29.

**अखिलगात्र** (akhila-gātra) *n.* the whole body, [*pl.*] all limbs of the body बलं चाखिलगात्रेषु मूर्च्छितं विपुलं महत् AhirbuS. 19. 22; बलं चाखिलगात्राणां त्वग्गतं वायुना सह। मूर्च्छितं सर्वगात्रैर्यत्तद्वीर्यं हस्तयोर्न्यसेत् PāraS. 4. 34; वसन्तराजेन…। विनेय एवाखिलगात्रवर्ती त्वन्मानरोगो भिषजा क्षणेन PadyaVe. 431.

**अखिलगिरिगण** (akhilagiri-gaṇa) *m.* group of all the mountains अङ्गीकुर्वन्ति भङ्गीमखिलगिरिगणास्तप्तजाम्बूनदीयाम् PadyāTa. 23.

**अखिलगुण** (akhila-guṇa) *m.* all (good) qualities, all virtues भीममपि भीमजायाः कलेवरं नवकलायकुसुमसमम्। सुन्दरमखिलगुणानां मन्दिरमेतत्समानमिदमेव RasSa. 88.

**अखिलगुणगणाढ्य** (akhilaguṇagaṇāḍhya) *adj.* endowed with all (good) qualities न वशे वर्तते यश्च यन्तुस्तं विद्याद् व्यालहस्तीत्यखिलगुणगणाढ्योऽपि न ग्राह्य एषः MātaLī. 3. 6.

**अखिलगुणगभीर** (akhilaguṇa-gabhīra) *adj.* [*f.* -ā] profound with all (good) qualities अखिलगुणगभीरां राधिकामर्चयामि StavMā. 69. 7.

**अखिलगुणपूर्ण** (akhilaguṇa-pūrṇa) *adj.* full of (i. e. endowed with) all (good) qualities अखिलगुणपूर्णम्…त्वाम्…प्रापमेकान्तभक्त्या ŚaṅkaDigVi. (Mā.) 5. 97.

**अखिलगुणवतीकदम्ब** (akhila-guṇavatīkadamba) *m.* the whole group of virtuous women अखिलगुणवतीकदम्बचेतःप्रचुरचमत्कृतिकारिसद्गुणाढ्याम् (त्वाम्)…गोकुलवरेण्यनन्दिनि। एषः…मिक्षते…जनः StavMā. 95. 26 (comm. अखिलानां गुणवतीकदम्बानाम्)

**अखिलगुणवन्ध्य** (akhilaguṇa-vandhya) *adj.* devoid of all (good) qualities श्मशानावस्थेऽस्मिन्नखिलगुणवन्ध्ये हतमरावपि द्विजाः केचिन्न खलु कलवाचः शकुनयः SūktiMu. 35. 1; Subhāṣi. 945.

**अखिलगुणविलोप** (akhilaguṇa-vilopa) *m.* effacement of all virtues युवजनमृगाणाम्…वनितासु…अखिलगुणविलोपनखरेखेव रोमराजीविनिर्गमः YaśasCam. ii. 59. 2.

**अखिलगुणसंश्रय** (akhilaguṇa-saṁśraya) *m.* abode of all virtues भूरमणीश्वर यदिदमखिलगुणसंश्रय। उक्तम्…तच्चित्रं न YaśasCam. i. 189. 1.

**अखिलगुणसाधक** (akhilaguṇa-sādhaka) *adj.* which establishes i. e. which proves (the existence or presence of) all (good) qualities जन्मादिकारणत्वगुणग्रहणं तु तस्याखिलगुणसाधकत्वेनान्योपलक्षणाभिप्रायेणैव TattvPrakā. 65B. 2 (*on* i. 4. 1)

**अखिलगुणाढ्य** (akhilaguṇāḍhya) *adj.* rich in all qualities (virtues or excellences) स्वयमखिलगुणाढ्यस्सूरिभिर्नित्यसेव्यः (एनं भजामः) ŚatDū. 171. 22.

**अखिलगुणानुगत** (akhilaguṇānugata) *adj.* [*f.* -ā] which followed (i. e. arose out of) all qualities or virtues (चन्द्रमतिम्) अखिलगुणानुगतामिव मतिपुः कीर्तिम्…अपश्यम् YaśasCam. ii. 82. 5.

**अखिलगुणाभिराम** (akhilaguṇābhirāma) *adj.* beautiful because of all (good) qualities अद्राक्षुश्च ते तत्र…अखिलगुणाभिराममारामम् NīlaVi. 123. 15.

**अखिलगुप्ति** (akhila-gupti) *f.* all the secrets रहस्यविद् मित्रार्युदासीनविजिगीषुमध्यमाखिलगुप्तिप्रयुक्तिप्रचारज्ञः BālaKrī. i. 182. 17 (*on* 1. 305)

**अखिलगुरु** (akhila-guru) *m.* teacher of all (i. e. teacher of the whole world) आदौ दधार धरणीधरणाय … । नारायणोऽखिलगुरुर्गुरुकोलदेहम् SātvaT. 2. 4; योगेश्वराखिलगुरो भगवन्नमस्ते BhāgP. i. 8. 43; viii. 3. 32; यामि परमां कदा मुक्तिं मुक्तिम्…अखिलगुरो GaṇeP. i. 14. 15; i. 61. 30.